(621) " जेषृ गतौ " (I-भ्वादिः-616. सक. सेट्. आत्म.)

जेषकः-षिका, जेषकः-षिका, जिजेषिषकः-षिका, जेजेषकः-षिका ;
जेषिता-त्री, जेषयिता त्री, जिजेषिषिता-त्री, जेजेषिता-त्री ;
इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककेपतिवत् (261) ज्ञेयानि ।
क्विपि-जेट्-जेड्-जेषौ-जेषः, इति रूपाणि इति विशेषः । [A]जेषः ।

(622) " जेहृ प्रयत्ने " (I-भ्वादिः-644. अक. सेट्. आत्म.)

'जेहतिर्गत्यर्थोऽपि ।' इति मा. धा. वृत्तौ ।

जेहकः-हिका, जेहकः-हिका, जिजेहिषकः-षिका, जेजेहकः-हिका ;
जेहिता-त्री, जेहयिता-त्री, जिजेहिषिता-त्री, जेजेहिता-त्री ; जेहमानः,
इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकगेपतिवत् (429) ज्ञेयानि । क्विपि
[1]झेट्-झेड्-जेहौ-जेहः इति रूपाणि । जेहः[B] । जेढिः[2] ।

(623) " जै क्षये " (I-भ्वादिः-914. अक. अनि. पर.)

[3]जायकः-यिका, [4]जापकः-पिका, [5]जिजासकः-सिका, [6]जाजायकः-यिका ;
जाता त्री, जापयिता-त्री, जिजासिता-त्री, जाजायिता-त्री ;
[7]जायन्-न्ती, जापयन्-न्ती, जिजासन्-न्ती ; —
जास्यन्-न्ती-ती, जापयिष्यन्-न्ती-ती, जिजासिष्यन्-न्ती-ती ; —
— जापयमानः, जापयिष्यमाणः, — जाजायमानः, जाजायिष्यमाणः ;

---

1. क्विपि, 'हो ढः' (8-2-31) इति ढत्वे, 'एकाचो बशो भष् झषन्तस्य स्ध्वोः' (8-2-37) इति भष्भावे, चर्त्वविकल्पे च रूपद्वयम् ।
2. क्तिनि, ढत्वधत्वष्टुत्वढलोपाः ।
3. 'आदेच उपदेशेऽशिति' (6-1-45) इत्यनैमित्तिके आत्वे, 'आतो युक् चिण्कृतोः' (7-3-38) इति युगागमः । एवं घञि णमुल्यपि ज्ञेयम् ।
4. आत्वे, आदन्तलक्षणः पुगागमः । एवं ण्यन्ते सर्वत्र ज्ञेयम् ।
5. द्वित्वे, 'सन्यतः' (7-4-79) इतीत्वम् । एवं सन्नन्ते सर्वत्र ज्ञेयम् ।
6. यङि, द्वित्वे, अभ्यासस्य 'दीर्घोऽकितः' (7-4-86) इति दीर्घः । एवं यङन्ते सर्वत्र ज्ञेयम् ।
7. '—अशिति' (6-1-45) इति प्रतिषेधात् पूर्ववायादेशे रूपम् ।
8. 'येषणासहरिजेषसम्भ्रमाज्ञेषितस्मृतिरपेषितो रथात् ॥' धा. का. 1-78.

B 'ह्लीहायितासुरभरक्षतिवेहितोर्वीभिषज्यजेहपरया निजबाह्वयैव ॥' धा. का. 1-81.